# শ্রীকৃষ্ণস্তোত্রং বসুদেবকৃতং ব্রহ্মবৈবর্তপুরাণান্তর্গতম্

{॥ শ্রীকৃষ্ণস্তোত্রং বসুদেবকৃতং ব্রহ্মবৈবর্তপুরাণান্তর্গতম্ ॥}

শ্রী গণেশায নমঃ ।

বসুদেব উবাচ --

ত্বামতীন্দ্রিযমব্যক্তমক্ষরং নির্গুণং বিভুম্ ।

ধ্যানাসাধ্যং চ সর্বেষাং পরমাত্মানমীশ্বরম্ ॥ ১॥

স্বেচ্ছামযং সর্বরূপং স্বেচ্ছারূপধরং পরম্ ।

নির্লিপ্তং পরমং ব্রহ্ম বীজরূপং সনাতনম্ ॥ ২॥

স্থূলাৎস্থূলতরং প্রাপ্তমতিসূক্ষ্মমদর্শনম্ ।

স্থিতং সর্বশরীরেষু সাক্ষিরূপমদৃশ্যকম্ ॥ ৩॥

শরীরবন্তং সগুণমশরীরং গুণোৎকরং ।

প্রকৃতিং প্রকৃতীশং চ প্রাকৃতং প্রকৃতেঃ পরম্ ॥ ৪॥

সর্বেশং সর্বরূপং চ সর্বান্তকরমব্যযম্ ।

সর্বাধারং নিরাধারং নির্ব্যূহং স্তৌমি কিং বিভুম্ ॥ ৫॥

অনন্তঃ স্তবনেঽশক্তোঽশক্তা দেবী সরস্বতী ।

যং বা স্তোতুমশক্তশ্চ পঞ্চবক্ত্রঃ ষডাননঃ ॥ ৬॥

Stotram Digitalized By Sanskritdocuments.org

চতুর্মুখো বেদকর্তা যং স্তোতুমক্ষমঃ সদা ।

গণেশো ন সমর্থশ্চ যোগীন্দ্রাণাং গুরোর্গুরুঃ ॥ ৭॥

ঋষযো দেবতাশ্চৈব মুনীন্দ্রমনুমানবাঃ ।

স্বপ্নে তেষামদৃশ্যং চ ত্বামেবং কিং স্তুবন্তি তে ॥ ৮॥

শ্রুতযঃ স্তবনেঽশক্তাঃ কিং স্তুবন্তি বিপশ্চিতঃ ।

বিহাযৈবং শরীরং চ বালো ভবিতুমর্হসি ॥ ৯॥

বসুদেবকৃতং স্তোত্রং ত্রিসন্ধ্যং যঃ পঠেন্নরঃ ।

ভক্তিং দাস্যমবাপ্নোতি শ্রীকৃষ্ণচরণাম্বুজে ॥ ১০॥

বিশিষ্টং পুত্রং লভতে হরিদাসং গুণান্বিতম্ ।

সঙ্কটং নিস্তরেত্তূর্ণং শত্রুভীতেঃ প্রমুচ্যতে ॥ ১১॥

॥ ইতি শ্রী ব্রহ্মবৈবর্তমহাপুরাণে বসুদেবকৃতং

শ্রীকৃষ্ণস্তোত্রং সম্পূর্ণম্ ॥

Encoded and proofread by

Singanallur Ganesan singanallur at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত়oday

http://sanskritdocuments.org

Krishna Stotram ( By Vasudeva ) Lyrics in Bengali PDF
% File name : vasudevakRRitakRRiShNastotraBVP.itx
% Location : doc_vishhnu
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Singanallur Ganesan singanallur at gmail.com, PSA Easwaran psaeaswaran at gmail.com
% Proofread by : Singanallur Ganesan singanallur at gmail.com, PSA Easwaran psaeaswaran at gmail.com
% Description-comments : brahmavaivartapurANa
% Latest update : April 5, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website